Naveen Shodh Sansar (An International Refereed/ Peer Review Research Journal)
RNI No.- MPHIN/2013/60638, ISSN 2320-8767, E- ISSN 2394-3793, Scientific Journal Impact Factor (SJIF)- 7.671
January to March 2024, E-Journal, Vol. I, Issue XLV

# रामायणे नैतिकमूल्यावबोधः

**डॉ. पंकज कुमार सिंह***

* असिस्टेंट प्रोफेसर (संस्कृत) श्रीमती एल.डी.एस.पी.ए.एस. कॉलेज, बरुन्दनी, भीलवाड़ा (राज.) भारत

**प्रस्तावना –** 'रमायणे चतुर्विंशतिः सहस्त्राणि श्लोकनमिति तत् चतुर्विंशति साहस्त्री – सहितापदेनाभिधीयते। संसारे किमपि काव्यं लोकप्रियतायां रामाणस्य समतां कर्त्तुं न क्षमते, रमायणमादिकाव्यं वाल्मीकिश्च तत्प्रणेतृतयाऽऽदिकवि रभिधीयते।

मूल्यं विना मानवस्य जीवनं न परिकल्पयते। अतः मानव जीवने अधिक्रियमाणायां शिक्षायां मूलस्य योजना नितान्तमावश्यकतां धत्ते वस्तुतः भारते वेदकालादेयाद्धावधि लोक शिक्षार्थ नाना ग्रन्थेषु साहित्येष्वपि मुल्यतत्त्वं प्रभूतत्वेन प्राप्यते।

वाल्मीकिना स्व काव्य कलायाः प्रदर्शना'त्पत्रमाधारीकृतं तस्य रामस्य चरितमेव तादृशं यतदाधारी कृत्य कोऽपि कविः साफल्यमासादयेत् यथोत्त्कं साकेते –

**'राम तुम्हारा चरित स्वयं ही काव्य है**
**कोई कवि बन जाम सहज संभाव्य है'**

अतो रामधारकं वाल्मीकि काव्यं रामायणं नितांतहृदयं सातिशयशिक्षाप्राप्भं च भूत्वा रसास्वाद सुखपिण्ड प्रदान द्वारेणविनेयान्विनयति यत्काव्यस्य मुख्यं प्रयोजनमुच्यते।

वाल्मीकिरपि स्वकाव्ये तथैव स्वीकृतवानस्ययादिति नाशचर्यजनकम। रामसीतयो निर्मलचरित्रता वाल्मीकेः कवित्वस्य चूडान्तं निदर्शनम्। रामस्य चरित्रं कविनाऽति–सावधानतया चित्रितम्।

**'कथञ्चिदुपकारेण कृतेनैकेन तुष्यति।**
**न स्मरत्यपकाराणां शतमप्यात्मवत्तया।।', (21 91 99)**

रामस्यावन्धयाभिलाषतां बोधयितुमिदमेकं पद्यमेव प्रर्याप्तम् –नास्यक्रोधः प्रसादो वा निरर्थोऽस्ति कदाचन। हन्त्येष नियमाद् वन्ध्यानवध्येषु न कुप्यति।।

रामस्य सीता विषयकानुराग एव न रावणवधं – प्रयोजितवान, अपितु कर्त्ताव्य बुद्धिरेव तथा कारितवती –

**'स्त्री प्रणष्टेति कारुण्यादाश्रितेत्यानृशंष्यतः।**
**पत्नी नष्टेति शोकेन प्रियेति मदनेन च।।'**

स्त्रीसामन्यकृतं दयालुत्वं, स्वाश्रितपीडेत्यक्रूरत्वं, पत्नीति शोकः प्रयेति कामश्चेति सर्व संभूयैव रावणवध – प्रयोजकतांमागमत न केवलोऽनुराग। तथा सति तदीयं महत्त्वं किञ्चिदपकृस्येतं लक्ष्मणे शक्तयाहते सति तदुद्वारा रामस्य भ्रातृप्रेम व्यञ्जनित–

**देशे देशे कलत्राणि देशे देशे च बान्धवाः।**
**तं तु देशं न पशयामि यत्र भ्राता सहोदरः।।**

रामस्य महत्त्वं तदाऽतीव स्फुटतां गच्छति यदाऽसौहतस्य रावणस्य संस्काराय स्वाश्रितान प्रेरयति– मरणान्तानि वैराणि निवृत्तां नः प्रयोजनम्।– क्रियतामस्य संस्कारों मामाप्येष यथा तव।।'

रामचन्द्र आदर्शभ्राता आदर्श पतिः आदर्श पुत्रः आदर्श शासकः आदर्श– मनुष्यचासीदिति समर्थयितुमेव रामायणंनिरयीमत, यत्र लक्ष्ये तत्सफलमभूत्।

रामोवनं गत्वापि भरतोपरि सन्देहं न कृतवान, लक्ष्मणोपरि विपदुपनिपाते स्वप्राणाँस्तृणाय मेने इत्यादिना तदादर्शभ्रातृता, सीतां परित्यज्यापि तदनुरागाग्नौ तिलशः स्वमजुहोदिति तस्यादर्शपतित्वं, पितुराशयोपनतं प्रकृतिभिरनुमोदितमपि राज्यं तत्याजेति तस्यादर्शपुत्रता, रामराज्यपदम– धुनाऽपि आदर्शराज्य पर्यायतामापन्नमिति तस्यादर्शशासकता व्यवहारमात्रेण च तस्यादर्शमनुष्यता प्रतीतेति सर्वथा विस्मयावहं चरित्रं रामचन्द्रस्य। तादृशं चरित्रं स्वीये काव्ये सृष्टवतः कवेर्वाल्मीकेन प्रथमोद्भूततामात्रेणादि – कवित्वमपि तु सर्वोत्कृष्टकाव्य प्रणयनसौभाग्य वत्तायाऽं– तदीयमादिकवित्वं प्रतिपन्नं भवति।

रामायणकालिकः समाज आदर्शवादमवलम्बते, पितुराज्ञांपुत्रौ मनुते, ज्येष्ठभ्रातरं भ्राता कनिष्ठ आद्रियते। रामायणे सत्यनिष्ठता – त्याग – करुणा दया – कर्त्तव्य निर्वाह विनयादयो नैतिकाध्यात्मिक मूल्ये स्वीकार्याः। एवं समाजिकोत्तरदायित्व – नागरिकता – लोकतंत्र – मानवतावाद समाजिक संवेदनशीलता–राष्ट्रियैकता पारस्परिक –सद्भावादमः दृश्यते।–[1]

सामाजिक मूल्यत्वेन राजनैतिकमूल्यत्वेन च, प्राणिस्वान्त्रय न्यायावसर प्रदान – परतन्त्रताद्यन्मूलनादीनि वैश्विकमूल्यत्वेन तथ्यपरकता – तर्कसङ्गतता – शानोत्सुकतादयो वैज्ञानिक मूल्यत्वेन परम्परा विश्वास – संस्कृतिसमुन्नयनादयः संस्कृतिक मूल्यत्वेन, प्रकृत्यादर – पर्यावरणसंरक्षण – पर्यावरणशुद्धि – वृक्षारोपण–वनसंरक्षण–पर्यावरणजागरुकतादयः पर्यायवरणमूल्य साधुता– न्यायप्रियता–स्वानुसाशन मैत्री लोकतान्त्रिकभावना – हिंसादयश्च भौतिकमूल्यत्वेन स्वीकर्तुं सुशकाः –[2]

भारतीय साहित्यं विशेषतः संस्कृतसाहित्यमेतान्येव मूल्यानि प्रतिपदमुपदिश्तीतिकथनं नानुचितम। यत्र रामायणे मूल्येतरवस्तुवर्णः दृश्यते, यथा आदर्शपात्राणामनुकरणीयतयावर्णनेन सह तत्प्रतीपपात्राणां सनिवेशनं केवलं तद्विमुखताऽऽपादनोपदेशणैव।

अतः रामादीनां वर्णनेन सह रावणादी कथनं केवलं परस्परपार्थक्यदर्शनपुरः सरंतदनुन्मुखत– द्योतनाय एव।

– रामायणम् अस्माकं संस्कृतिं प्रतिनिधत्ते। एतद्भारतीय संस्कृतिप्रतिनिधिकाव्यमस्ति। अत्र धर्मस्य, सत्यस्य, वृत्तस्य च प्राधान्यमस्ति। इमंश्लोकं विलोकयन्तु–

**'सर्वे नराश्च नार्यश्च धर्मशीला: सुसंयता:।**
**मुदिता: शीलवृत्ताभ्यां महर्षय इवामला:।।'**

तथा च–

**'धर्मार्थकामा खलु जीवलोके समीक्षिता धर्मफलोदयेषु।**
**ये तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा।।'**

तत्र जना: दानदयाध्ययनशीला: सुसंयता:, आस्तिका:, बहुश्रुता:, बहुज्ञा:, सत्यवादिन:, विद्वांस: तपस्विनश्चासन्।
रामराज्यस्य वैशिष्ट्यं तु सर्वथा समीचीनम्–

**'नाकाले म्रियते कश्चिन्न व्याधि: प्राणिनां तथा।**
**नानर्थोविद्यते कश्चिद् रामे राज्यं प्रशासति।।'**

अलौकिकगुणगणविभूषितस्य अस्य रामायणकाव्यस्य सर्वत्र प्रशंसा कृता वर्तते रामायणकाव्यरसामृतं निपीय जन: परं पदं लब्धुमर्हति। यथोक्तम् –

**'वाल्मीकि: कविसिंहस्य कवितावनचारिण:।**
**श्रण्वन् रामकथानादं को न याति परं पदम्।।'**

रामायणस्य अधोलिखिता सूक्तिस्तु परमप्रसिद्धा–

**'सदूषणापि निर्दोषा सखरापि सुकोमला।**
**नमस्तस्मै कृता येन रम्या रामायणी कथा।।'**

वाल्मीकि: स्वयमुक्तं रामायणे –
**न ह्यन्योऽर्हति काव्यानां, यशोभाग् राघवाद् ऋते।** (राम.उत्तरका.98/18)
महाकाव्यमिदं गायत्रीमन्त्रवदेव परमपावनतां विभर्ति स्म। यथा वैदिकवाङ्मयेगायत्रीमन्त्रो बुद्धिवर्धक: शान्तिदायकश्च विद्यते तथैव लौकिकसाहित्ये रामायणमपिबुद्धिशोधकं मनश्शान्तिदायकं च वर्तते। तदुक्तमपि –

**रामायणं नाम परं तु काव्यं सुपुण्यदं वै शृणुत द्विजेन्द्रा: ।**
**यस्मिञ्छ्रुते जन्मजरादिनाशो भवत्यदोष: स नरोऽच्युत: स्यात।।**

अस्मिन् काव्ये 'कर्तव्यशिक्षा' सर्वजनोपयोगित्वं वर्तते। यथा – 1. पितरं प्रतिपुत्रस्यकर्त्तव्यम् 2. भ्रातरं प्रति अनुजस्य कर्त्तव्यम्, 3. पतिं प्रति पत्न्या: कर्त्तव्यम्, 4. राजानं प्रतिअमात्यस्य कर्त्तव्यम्, 5. स्वामिनं प्रति सेवकस्य कर्त्तव्यम्, 6. मित्रं प्रति मित्रस्य कर्त्तव्यम्, 7. प्रजाजनान् प्रति राज्ञ: कर्त्तव्यम् । एतेनैव च हेतुना भारतवर्षस्य क्षेत्रे क्षेत्रे, कोणे कोणे, गेहे गेहे, जने जने च महाकाव्यरामायणं प्रति हार्दिकी श्रद्धा दृश्यते।

यावत् पर्यन्तं कवे: समक्षं वर्णनीयं वस्तुनागतं तावदयं मौनमादधौ यदैव क्रौञ्चवधं करुणरसंदृष्टवान्, तदैवाकस्मादेवास्य मुखात् काव्यप्रवाहो निर्गत:, तदस्य काव्ये करुण रस एव प्रधानत्वं भजते। कविताया लोकहितमुद्देश्यंस्यादिति वाल्मीकिना कदापि न विस्मृतम्। अत एव चरित्रसृष्टौ वर्णने वा सर्वत्र कवि- रुच्चमादर्शविचारं च व्यञ्जितवान्। सामान्यरूपेण सर्वजनानां पुरुषाणां स्त्रीणाम्, ज्ञानीनाम्–अज्ञानाम्, धनिनां–निर्धनानाम्, आबालवृद्धं कण्ठाभरणताम् आपद्यते। रामायणं सर्वत्र आद्रियते, भक्तानां भवनेषु च प्रतिदिनं पारायणीक्रियते। सत्यं कथ्यते भगवता वाल्मीकिना–

**यावत् स्थास्यन्ति गिरय: सरितश्च महीतले।**
**तावत् रामायणकथा, लोकेषु प्रचरिष्यति।।** (रामा. वाल का 2/36)

रामायणस्य तादृशी लोकप्रियता यथा नकेवलमेतद् विदुषामेव विभूषणम्, अपि तु सामान्यरूपेण सर्वजनानां धनिनां –निर्धनानाम्, विदग्धानाम् –अज्ञानाम्, पुरुषाणां स्त्रीणाम्, आबालवृद्धं कण्ठाभरण- ताम् आपद्यते। आचारसंहिता रूपेणेदं सर्वत्र आद्रियते, भक्तानां भवनेषु चप्रतिदिनं पारायणीक्रियते। अत: सत्यमुच्यते भगवता वाल्मीकिना यद् –

**यावद् स्थास्यन्ति गिरय: सरितश्च महीतलं।**
**तावद् रामायणकथा लोकेषु प्रचरिष्यति।। रामायण बालकाण्ड 2–36**

**संदर्भ ग्रंथ सूची :–**

1. बलदेव उपाध्याय– संस्कृत साहित्य का इतिहास (Vol. I)
2. बलदेव उपाध्याय– संस्कृत साहित्य का इतिहास (Vol. II)
3. वाल्मीकि रामायण –(219199)

**************